कार्य्यसिद्धेः क्षणिकत्वम्" सां सू० ।

**असिधारा** स्त्री ६त० । खड्गस्य तीक्ष्णाग्रभागे । "असिधारापरिहृतःकामं चक्रस्य तेन ते" । सुरगज इव दन्तैर्भग्नदैत्यासिधारैः" इति च रघुः ।

**असिधाराव्रत** न० असिधारायां स्थितिरिव दुष्करं व्रतम् । असिधारास्थिति तुल्यदुष्करे व्रते असिधारायां स्थितौ मनाक् स्खलने यथा नाशः एवं मनाक्स्खलने यत्रानिष्टं, तादृशे व्रते तच्च यादवेन दर्शितं यथा । "युवा युवत्या सार्द्धं यन् मुग्धा भर्त्तृवदाचरेत् । अन्तर्निवृत्तसङ्गःस्यादसिधाराव्रतं हि तत् "असिधाराव्रतमिदं सखे यदरिणा सह संवासः" हितो० सतां केनोद्दिष्टं विपुलमसिधाराव्रतमिदम्" नीतिः ।

**असिधाव** पु० असिं खड्गं धावयति मार्ज्जयति धाव-अण् । शस्त्राणां मार्ज्जनकरे । ण्वुल् । असिधावकोऽप्यत्र ।

**असिधेनुका** स्त्री असिर्धेनुरिव यस्याः वा कप् । असेर्धेनुतुल्यत्वेन तद्वत्तुल्यायाम् छुरिकायाम् । कबभावे असिधेनुरप्यत्र ।

**असिपत्र** पु० असिरिव तीक्ष्णं पत्रमस्य वा कप् । १इक्षुवृक्षे "जातं तमात्मन्यसिपत्रवृक्षम्" रघुः । २गुण्ड्रनामकतृणे च असेः पत्रमिवाच्छादकम् । ३खड्गकोषे न० । असिपत्राकारोऽस्त्यस्य अर्श०अच् । इक्षुपत्राकारे ४उभयतोधारे खड्गे च "अत्याक्षीत् स्वासिपत्रादीनबभासत् परश्वधान्" भट्टिः ।

**असिपत्रवन** न० असिरिव पत्रमस्य तादृशं वनम् । असिपत्रवने नरकभेदे तत्स्वरूपादि भाग०५स्क०। अन्धतामिस्रादिकमुपक्रम्य "कालसूत्रमसिपत्रवनं सूकरमुख"मित्यादिना नरकभेदान् दर्शयित्वा तत्स्वरूपं कारणञ्चोक्तं तत्रैव "यस्त्विह वै निजपथादनापद्यपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्रासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गोहाहतोस्मीतिपरमया वेदनया मूर्च्छितः पदेपदे निपतति स्वधर्म्महा पाषण्डानुगमनफलं भुङ्क्ते" "असिपत्रवनं नाम नरकम् शृणु चापरम् योजनानां सहस्रं वै ज्वलदग्न्यास्तृतावनिः । तप्तास्सूर्य्यकरैश्चण्डैः कल्पकालाग्निदारुणैः । प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः । तन्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते । पत्राणि यत्र खड्गानि फलानि द्विजसत्तम! । श्वानश्च तत्र शवलाश्चरन्त्यमितलोभिनः । महावक्त्रा महादंष्ट्रा व्याघ्रा इव महानखाः । ततस्तद्वनमालोक्य शिशिरच्छायमग्रतः । प्रयान्ति प्राणिनस्तत्र तृट्तापपरिपीड़िताः । हा तात ! हा मातरिति क्रन्दन्तोऽतीव दुःखिताः । दह्यमानाङ्घ्रियुगलाधरणिस्थेन वह्निना । तेषां गतानां तत्रासिपत्रव्यापि समीरणः । प्रवाति तेन पात्यन्ते तेषां खड्गास्तथोपरि । छिन्नाः पतन्ति ते भूमौ ज्वलत्पावकसञ्चये । लेलिह्यमाने चातीव व्याप्ताशेषमहीतले । सारमेयास्ततः शीघ्रं शातयन्ति शरीरतः । तेषां खण्डानि रुदतामदन्त्यान नभीषणाः । असिपत्रवनं तात ! मयैतत् परिकीर्त्तितम्" इति मार्क० पु० । "असिपत्रवनं चैव लोहदारकमेव च" मनुः ।

**असिपत्रव्रत** न० अश्वमेधे कर्त्तव्ये व्रतभेदे । [जलजन्तुभेदे ।

**असिपुच्छ** पु० असिरिव धारायुक्तः पुच्छोऽस्य । शिशुमारे

**असिपुत्रिका** स्त्री असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्त्वम् । छुरिकायाम् । कनभावे असिपुत्रीत्यप्यत्र ।

**असिमेद** पु० असिरिव तीक्ष्णः मेदो निर्यासो यस्य । विट्खदिरे

**असिर** त्रि० अस+क्षेपे किरच् । क्षेपके । "यःसूर्य्यस्यासिरेण मृज्यते" ऋ० ८,७६,४ ।

**असिलोमन्** पु० असिरिव तीक्ष्णं लोमास्य । दनोःपुत्रभेदे । "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारतेत्युपक्रम्य "असिलोमा च केशी च दुर्ज्जयश्चैव दानवः" भा०आ०प० ६५ अध्या० हरिवंशे तु "अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमा" इत्युपक्रम्य शतपुत्रमध्ये "असिलोमा च केशी च शठश्च बलकोऽमदः" इत्युक्तम् । "असिलोमा पुलोमा च वाश्कलः प्रमदोऽमद" इति च हरि० । स च देवासुरयुद्धे वायुना सह युयुधे "असिलोमाथ बलिना मारुतेन महाहवे" हरिवं २४४ अध्या० । त्रिविक्रमावसरे च स हरिणा सह युयुधे विष्णुना हतश्च "असिलोमा हरिश्चैव जघ्नतुर्वै परस्परमित्युपक्रम्य १६१अध्या० "विप्रचित्तिः शिवःशङ्कुरित्युपक्रम्य च "असिलोमा पुलोमाचेत्यादिना बहून् दैत्यान् युयुधानानभिधाय" "प्रमथ्य सर्वान् दैतेयान् पादहस्ततलैः प्रभुः । जहार त्रिदिवं देवस्त्रिभिर्विक्रमणैर्हरिः" हरि० २६३ अ० वामनेन तद्दलनमुक्तम् । "असिलोम्नोऽपहन्ता वै तथा रावणनाशनः" विष्णुस्तवः ।

**असिहत्य** त्रि० असिना हत्यः घात्यः हन—बा० क्यप् ३त० । खड्गेन हननीये । भवादौ अण् अनुशतिका० द्विपदवृद्धिः आसिहात्यः ।

**असिहेति** पु० असिर्हेतिः साधनमस्य । खड्गेन युद्धकर्त्तरि ।

**असु** पु० असृते क्षिप्यते अस—उन् । १चित्ते । कर्त्तरि उन् ।